# A-II/1/2335/ 21

## चतुर्थसत्रार्द्धम्

## प्रथमपत्रम्

## साहित्यम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. शिवस्य उपकरणं किम् ?
2. कीदृशः परमार्थो न ?
3. 'द्वितयमप्येतत्' – अत्र द्वितयं किम् ?
4. समाचारः कः ?
5. अपूर्वत्वं कयोः सम्भवति ?
6. व्यवहारिभिः सत्काव्याधिगमात् किम् आप्यते ?
7. काव्यामृतरसद्वारा कः वितन्यते ?
8. अलङ्कृतिः किम् उपोद्धृत्य विवेच्यते ?
9. 'शब्दार्थौ काव्यम्' इत्यस्य कोऽर्थः ?
10. 'प्रकाशस्वाभाव्यम्. . . . .' इत्यादौ पद्ये कीदृशेन कविना किम् उपनिबद्धम् ?
11. 'बन्धे व्यवस्थितौ काव्यम्' इत्यनेन किं वार्यते ?

**अथवा**

अर्थः कदा मृतकल्पोऽवतिष्ठते ?

12. द्योतकव्यञ्जकावपि वाचकावेव – कथम् ?

**अथवा**

वाच्यवाचकयोः काव्यगतः परमार्थः कः ?

13. सामान्याभिधायी शब्दः कदा सहृदयहृदयहारितां प्रतिपद्यते ?

**अथवा**

विशेषात्मना वस्तुप्रतिपादनावसरे कविः कीदृशं पदं प्रयुङ्क्ते ?

14. ‘द्वयं गतं. . . . .’ इत्यादौ पद्ये ‘सम्प्रति’ इत्यस्य वक्रता कथं भवति ?

**अथवा**

उभावेतावलङ्कार्यौ – कौ ?

15. शब्दार्थयोरलङ्कृतिः का ?

**अथवा**

‘मैथिली तस्य दाराः’ इत्यत्र का वक्रता ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. शास्त्रातिरिक्तं प्रगुणं प्रयोजनं काव्यबन्धस्य – कुन्तकोक्तदिशा वर्णयत।

17. ‘वस्तुमात्रं शोभातिशयशून्यं न काव्यव्यपदेशमर्हति’ – सोदाहरणं विवृणुत।

18. “बन्धे व्यवस्थितौ शब्दार्थौ” इत्यस्याशयं स्पष्टयत।

**अथवा**

शब्दस्य शब्दान्तरेण साहित्यविरहं सोदाहरणं विवृणुत।

19. सुकुमारमार्गगतम् आभिजात्यं विवृणुत।

**अथवा**

रघुवंशे सिंहदिलीपयोः संवादे वक्रतां कुन्तकोक्तदिशा वर्णयत।

20. ‘रामोऽसौ भुवनेषु’ इत्यादिपद्ये पदपूर्वार्धवक्रतां प्रतिपादयत।

**अथवा**

क्रियावैचित्र्यवक्रतां सोदाहरणं प्रतिपादयत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. वाच्यवाचकयोः विशिष्टं साहित्यं सोदाहरणं विवृणुत।

**अथवा**

सुकुमारमार्गं कुन्तकाचार्योक्तदिशा विवृणुत।

**अथवा**

‘भर्तुर्मित्रं प्रियमविधवे. . . . .’ इत्यादौ पद्ये कुन्तकाचार्योक्तदिशा वक्रतां प्रदर्शयत।

# A-II/2/2336/ 21

## चतुर्थसत्रार्द्धम्

## द्वितीयपत्रम्

## साहित्यम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. ललनालावण्यप्रख्यः अर्थः कः ?
2. लावण्यसिन्धुरपरैव इत्यादिपद्ये व्यङ्ग्यार्थः कः ?
3. व्यङ्ग्यांशानुगमे सति प्रायेण परां छायां कः बिभ्रति ?

**अथवा**

अतिशयोक्तिगर्भता कुत्र शक्यक्रिया भवति ?

4. प्रतीयमानच्छाया कीदृशी भूषा।
5. अर्थान्तरगतेः काक्वा परिदृश्यमाने कीदृशं गुणीभूतव्यङ्ग्यत्वम् ?
6. रीतयः काः ?

**अथवा**

काव्यलक्षणे ज्ञाते काः प्रकाशन्ते ?

7. काव्यस्य सर्वस्मिन् प्रकारे कस्य अर्थस्य स्पर्शेन सौभाग्यम् ?
8. कवीनां प्रतिभागुणः केन आनन्त्यम् आयाति ?
9. तिरस्कृतवाच्यध्वनिसमाश्रयेण अपूर्वत्वं कथम् ?
10. के नवा इवाभान्ति ?

**अथवा**

महाभारते अङ्गीरसः कः ?

11. "भगवान् वासुदेवश्च कीर्त्यतेऽत्र सनातनः" इति श्लोकवाक्येन किं प्रतिपाद्यते ?
12. कः आनन्त्यम् आयाति ?

**अथवा**

'स्मितं किञ्चिन्मुग्धम्' इत्यादिपद्यं कस्य उदाहरणम् ?

13. काव्यमार्गः कस्मात् अनन्ततां प्राप्तः ?

14. रसपरिग्रहः कुत्र भवेत्?

**अथवा**

'एवं वादिनि देवर्षौ' इत्यादिश्लोके नवत्वं कथम्?

15. कस्मिन् काव्ये मोक्षलक्षणः पुरुषार्थः विवक्षाविषयत्वेन सूचितः?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः। (5×6=30)**

16. 'अनन्ता हि वाग्विकल्पाः तत्प्रकारा एव चालङ्काराः' इति ग्रन्थोक्तदिशा व्याख्यात।

17. प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम्। धत्ते रसादितात्पर्यपर्यालोचनया पुनः॥
–इति कारिकां व्याख्यात।

**अथवा**

रामायणे करुणस्य अङ्गित्वं साधयत।

18. चित्रकाव्यं सप्रभेदं निरूपयत।

**अथवा**

मुख्या महाकविगिरामलङ्कृतिभृतामपि। प्रतीयमानच्छायैषा भूषा लज्जेव योषिताम्॥
–इति कारिकां व्याख्यात।

19. राजानमपि सेवन्ते विषमप्युपभुञ्जते। रमन्ते च सह स्त्रीभिः कुशलाः खलु मानवाः॥
–ससन्दर्भं व्याख्यात।

20. अतो ह्यन्यतमेनापि प्रकारेण विभूषिता। वाणी नवत्वमायाति पूर्वार्थान्वयवत्यपि॥
–व्याख्यात।

**अथवा**

व्यङ्ग्यव्यञ्जकभावेऽस्मिन् विविधे सम्भवत्यपि। रसादिमय एकस्मिन् कविः स्यादवधानवान्॥
–कारिकां व्याख्यात।

**स. निबन्धात्मकः प्रश्नः समाधेयः। (1×20=20)**

21. अलङ्काराणां वक्रोक्तिगर्भत्वं वक्रोक्तेः महत्त्वं च प्रतिपादयत।

**अथवा**

महाभारते अङ्गीरसः शान्तः इति ध्वन्यालोकदिशा प्रतिपादयत।

**अथवा**

'संवादा तु भवन्त्येव' इति यथाग्रन्थं साधयत।

# A-II/3/2337/ 21

## चतुर्थसत्रार्द्धम्

## तृतीयपत्रम्

## साहित्यम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. स्थायिभावस्य लक्षणं किम्?
2. नव रसाः के?
3. 'वागर्थाविव संपृक्तौ' – इत्यत्र रसध्वनिः कथं न सिद्ध्यति?
4. मोहस्य किं लक्षणम्?
5. प्राचीनोक्ताः दश शब्दगुणाः के?
6. उत्तमे कौ हास्यभेदौ?
7. रसाभासः कः?
8. वितर्कस्य किम् उदाहरणम्?
9. हास्यस्य कति भेदाः? के च ते?
10. रसविरोधः कतिविधः?
11. अर्थगुणे ओजसि वामनप्रोक्ताः पञ्चप्रकाराः के?

**अथवा**

रसालङ्कारः कः?

12. 'माधुर्यभारभङ्गुर-सुन्दर-पदवर्णविन्यासा' –अत्र का रीतिः?

**अथवा**

'शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः' –इत्यत्र कथम् अश्रव्यता?

13. महाभारते अङ्गिरसः कः?

**अथवा**

रसाभासस्य लक्षणं किम्?

14. निद्रायाः किं लक्षणम् ?

**अथवा**

माधुर्यगुणः केषु रसेषु भवति ?

15. अनुभावसंज्ञाव्युत्पत्तिं दर्शयत ?

**अथवा**

रतेः वियोगकालावच्छिन्नत्वे कः रसः ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. जगन्नाथदिशा भक्तेः रसत्वं निराकुरुत।

17. शृङ्गारस्य द्वैविध्यं सोदाहरणं प्रतिपादयत।

18. 'सन्तापयामि. . . .' इति पद्यं विलिख्य धृतिलक्षणसमन्वयं कुरुत।

**अथवा**

भावसन्धिं सोदाहरणं निरूपयत।

19. प्रसिद्धौचित्यबन्धः कः? – विशदयत।

**अथवा**

यथाग्रन्थं रसयोर्ज्ञानविरोधम् उपस्थापयत।

20. रसानां परस्परं विरोधाविरोधौ प्रतिपादयत।

**अथवा**

'सुराङ्गनाभिराश्लिष्टा व्योम्नि वीरा विमानगाः' –इत्यत्र कौ विरोधिरसौ ? अविरोधश्च कथम् ?

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. जगन्नाथदिशा शान्तरससत्तां निरूपयत।

**अथवा**

केषाञ्चन पञ्चानां व्यभिचारिभावानां लक्षणं सोदाहरणं प्रतिपादयत।

**अथवा**

जगन्नाथमतानुसारेण गुणान् विवेचयत।

# A-II/4/2338/21

## चतुर्थसत्रार्द्धम्

## चतुर्थपत्रम्

## साहित्यम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. त्वां प्रणन्तुं कः प्रभवति ?

**अथवा**

विरिञ्चिः किं संचिन्वन् लोकान् विरचयति ?

2. अविद्यानाम् – इति पदस्य अर्थः कः ?

**अथवा**

मुररिपुवराहस्य दंष्ट्रा का ?

3. पाणिभ्याम् अभयवरदः कः ?

**अथवा**

हरिः कं क्षोभम् अनयत् ?

4. अनङ्गः कस्मात् कृपां लब्ध्वा जगद् विजयते ?

**अथवा**

करिकलभकुम्भस्तननता – अत्र कोऽलङ्कारः ?

5. व्योभजनकः कः ?

**अथवा**

मही कस्मिन् चक्रे वर्तते ?

6. कुलकुण्डे – अस्य पदस्य कोऽर्थः ?

7. श्रीचक्रे मूलप्रकृतयः कति भवन्ति ?

8. वर्षीयांसम् – अस्य पदस्यार्थः कः ?

9. क्षितौ कति मयूखा भवन्ति ?

10. गीर्वाणगणिका उर्वश्या सह कस्य वश्या भवन्ति ?

11. चिकुरनिकुरम्बम् – अस्य पदस्यार्थः कः?

12. भगवत्याः किं नयनम् अहः सूते?

13. जपापुष्पच्छाया का?

14. द्रविडशिशुः कवयिता कथम् अजनि?

15. भगवत्या मञ्चत्वं के गताः?

**ब. सप्रसङ्गं व्याख्यात –** **(5×6=30)**

16. महासंवर्ताग्निर्विरचयति नीराजनविधिम्।

**अथवा**

भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते।

17. स्वतन्त्रं ते तन्त्रं क्षितितलमवातीतरदिदम्।

**अथवा**

भवानि त्वं दासे वितर मयि दृष्टिं सकरुणाम्।

18. निजां वीणां बाणी निचुलयति चोलेन निभृतम्।

**अथवा**

महासंहारेऽस्मिन् विहरति सति त्वत्पतिरसौ।

19. सपर्यापर्यायस्तव भवतु यन्मे विलसितम्।

20. द्विषां वृन्दैर्वन्दीकृतमिव नवीनार्ककिरणम्।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. सौन्दर्यलहरीम् आश्रित्य मूलाधारादीनि षट् चक्राणि वर्णयत।

**अथवा**

सौन्दर्यलहरीम् अनुसृत्य भगवत्याः सौन्दर्यं प्रतिपादयत।

# A-II/5/2339/ 21

## चतुर्थसत्रार्द्धम्

## पञ्चमपत्रम्

## साहित्यम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. लघुत्रय्यां के ग्रन्थाः अन्तर्भवन्ति ?

2. नैषधीयचरितस्योपरि मल्लिनाथस्य का व्याख्या अस्ति ?

3. महाकवि-कालिदासकृतखण्डकाव्यानां नामानि लिखत।

4. डॉ रेवाप्रसादद्विवेदिमहोदयस्य ग्रन्थाः के ?

5. "सञ्चारिणी दीपशिखेव रात्रौ" कस्य इदं वाक्यम् ? कस्मिन् काव्ये अस्ति ?

**अथवा**

उत्तररामचरिते कति अङ्काः सन्ति ?

6. "अभिषेकनाटकम्" कस्य कृतिः ?

**अथवा**

बाणस्य रचनाद्वयं किम् ?

7. वासवदत्ता कस्य रचना ?

**अथवा**

उत्तररामचरिते को रसः प्रधानः ?

8. मुद्राराक्षसे मुख्यः रसः कः ?

**अथवा**

सत्यव्रतशास्त्रिणः रचनाद्वयं किम् ?

9. मेघगीतम्, काकली, लीलापद्मम् इत्यादयः कस्य कृतयः ?

**अथवा**

उत्तरसीताचरितं स्वातन्त्र्यसम्भवम् इति कस्य कवेः कृतिः ?

10. 'तदेव गगनं सैव धरा' 'बलदेवचरितम्' कस्य कवेः ग्रन्थद्वयम्?

11. भट्टमथुरानाथशास्त्रिणः समयः कः?

12. अरस्तुमहोदयस्य कृतिद्वयं लिखत।

13. श्रीकण्ठपदलाञ्छनः पदवाक्यप्रमाणज्ञश्च कः?

14. दशकुमारचरितस्य कर्ता कः?

15. 'प्रज्ञाभारती' इति कस्य उपाधिः वर्त्तते?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. "नाटकेषु शकुन्तला" इत्यस्य आशयम् उदाहरणपुरस्सरं स्पष्टयत।

17. "माघे सन्ति त्रयो गुणाः" इति उदाहरणैः स्पष्टयत।

**अथवा**

रामकरणशर्मणः जीवनादर्शं वर्णयत।

18. "आतपत्रभारविः" इति आभाणकं प्रतिपादयत।

**अथवा**

आचार्यजानकीवल्लभशास्त्रिणः परिचयो देयः।

19. "वाणी बाणो बभूव " इति आभाणकं वर्णयत।

**अथवा**

क्रोचेमहोदयस्य देशकालकृतीश्च प्रतिपादयत।

20. राधावल्लभत्रिपाठिमहोदयस्य संक्षिप्तपरिचयो देयः।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. लौञ्जाइनस्-महोदयस्य उदात्ततत्त्वं सविस्तरं प्रतिपादयत।

**अथवा**

"महाकवि-कालिदासस्य" जीवनादर्शं प्रतिपादयत।

**अथवा**

होरेसमहोदयस्य जीवनादर्शं वर्णयत।